# ॥ वाल्मीकि रामायण ॥

## ५ सुन्दरकाण्ड

### अध्याय ४८

तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम् ।
रोषेण महताविष्टो रावणो लोकरावणः ॥ १ ॥

स राजा रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् ।
कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ॥ २ ॥

दुरात्मा पृच्छ्यतामेष कुतः किं वास्य कारणम् ।
वनभङ्गे च कोऽस्यार्थो राक्षसीनां च तर्जने ॥ ३ ॥

रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् ।
समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥ ४ ॥

यदि तावत्त्वमिन्द्रेण प्रेषितो रावणालयम् ।
तत्त्वमाख्याहि मा ते भूद्भयं वानर मोक्ष्यसे ॥ ५ ॥

यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च ।
चारुरूपमिदं कृत्वा यमस्य वरुणस्य च ॥ ६ ॥

विष्णुना प्रेषितो वापि दूतो विजयकाङ्क्षिणा ।
न हि ते वानरं तेजो रूपमात्रं तु वानरम् ॥ ७ ॥

तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ।
अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥ ८ ॥

अथ वा यन्निमित्तस्ते प्रवेशो रावणालये ॥ ९ ॥

एवमुक्तो हरिवरस्तदा रक्षोगणेश्वरम् ।
अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा ॥ १० ॥

धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ।
जातिरेव मम त्वेषा वानरोऽहमिहागतः ॥ ११ ॥

दर्शने राक्षसेन्द्रस्य दुर्लभे तदिदं मया ।
वनं राक्षसराजस्य दर्शनार्थे विनाशितम् ॥ १२ ॥

ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकाङ्क्षिणः ।
रक्षणार्थं च देहस्य प्रतियुद्धा मया रणे ॥ १३ ॥

अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ।
पितामहादेव वरो ममाप्येषोऽभ्युपागतः ॥ १४ ॥

राजानं द्रष्टुकामेन मयास्त्रमनुवर्तितम् ।
विमुक्तो अहमस्त्रेण राक्षसैस्त्वतिपीडितः ॥ १५ ॥

दूतोऽहमिति विज्ञेयो राघवस्यामितौजसः ।
श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥ १६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com